## खण्डिकादिभ्यश्च। (४५/१२५४)

खण्डिका इत्येवमादिभ्यः शब्देभ्योऽञ् प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [1]विषये। [2]आद्युदात्तार्थमचित्तार्थं च वचनम्। [3]खण्डिकानां समूहः खाण्डिकम्। वाडवम्। [4]क्षुद्रकमालवशब्दोत्र पठ्यते। क्षुद्रकाश्च मालवाश्च इति क्षत्रियद्वन्द्वः। ततः पूर्वेणैवाञि सिद्धे वचनं गोत्र[5]वुञ्(४.२.३९/१२४६)बाधनार्थम्। ननु च परत्वादञा वुञ् बाधिष्यते, न च [6]गोत्रसमुदायो गोत्रं, न च [7]तदन्तविधिरत्रास्ति (म. भा. २.२८०)? एवं तर्हि एतज् ज्ञापयति वुञि पूर्वविप्रतिषेधः, सामूहिकेषु च तदन्तविधिरस्ति (म. भा. २.२८०) इति। प्रयोजनमौपगवकं कापटवकम् इति वुञ् भवति, [8]वानहस्तिकं गौधेनुकम् इति [9]च तदन्तविधिः। क्षुद्रकमालवात् इत्येतावता योगविभागेन पूर्वविप्रतेषेधस्तदन्तविधिश्च [10]ज्ञापितः, पुनरस्यैव नियमार्थमुच्यते सेनासञ्ज्ञायाम् इति। क्षुद्रकमालवात् सेनासंज्ञायामेवाञ् भवति[11]। क्षौद्रकमालवी सेना। क्षौद्रकमालवमन्यत् (म.भा. २.२८१)।

अञ्सिद्धिरनुदात्तादेः कोऽर्थः क्षुद्रकमालवात्।
गोत्राद् वुञ् न च तद्गोत्रं तदन्तान्न च सर्वतः॥
ज्ञापकं स्यात्तदन्तत्वे तथाचापिशलेर्विधिः।
सेनायां नियमार्थं च यथा बाध्येत चाञ् वुञा (म.भा. २.२८१)॥

खण्डिका। वडवा। 'क्षुद्रकमालवात् सेनासञ्ज्ञायाम्' (ग. सू. ८२)। भिक्षुक। [12]शुक। उलूक। श्वन्। युग। अहन्। वरत्रा। [13]हलबन्ध॥

## चरणेभ्यो धर्मवत्। (४६/१२५५)

चरणशब्दाः कठकलापादयः[14], तेभ्यः [15]षष्ठीसमर्थेभ्यः समूहे धर्मवत् प्रत्यया भवन्ति। गोत्रचरणाद् वुञ् (४.३.१२६/१५०६) इत्यारभ्य प्रत्यया [16]वक्ष्यन्ते, तत्र चेदमुच्यते 'चरणाद्धर्माम्नाययोः'(४.३.१२६/१५०६ वा.) इति, तेन धर्मवत् इत्यतिदेशः क्रियते। वतिः सर्वसादृश्यार्थः। कठानां धर्मः काठकम्। [17]कालापकम्। छान्दोग्यम्। औक्थिक्यम्। आथर्वणम्। तथा समूहेऽपि[18]–[19]काठकम्। कालापकम्। [20]छान्दोग्यम्। [21]औक्थिक्यम्। आथर्वणम्॥

## अचित्तहस्तिधेनोष्ठक्। (४७/१२५६)

अचित्तार्थेभ्यो[22] हस्तिधेनुशब्दाभ्यां च ठक् प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [23]विषये। अणञोरपवादः। [24]अपूपानां समूहः आपूपिकम्। शाष्कुलिकम्[25]। हास्तिकम्। धैनुकम्।

[४२३] धेनोरनञ इति वक्तव्यम्। (म.भा. २.२८१)

[26]आधेनवम् (म.भा. २.२८१)॥

---

1. अर्थे फ. 2. आद्युदात्तार्थमयमारम्भः अचित्तार्थश्च फ. 3. खण्डिकानां समूहः नास्ति फ. 4. क्षुद्रमालववत् संज्ञायाम् फ. 5. वुञः बाधनार्थम् ब. क. ह. 6. गोत्रसमुदाये क. 7. तदन्तविधिरिति क. 8. वनहस्तिनां समूहः इत्यधिकम् क. 9. च नास्ति फ. 10. ज्ञापकः फ. 11. इति इत्यधिकम् क. 12. शुक्ल फ. 13. गलबन्ध फ. 14. शब्दाः इत्यधिकम् ह. 15. षष्ठ्यर्थेभ्यः ब. 16. विधीयन्ते ह. 17. कालापकम् नास्ति फ. 18. विधीयते इत्यधिकम् फ. ह. 19. काठकम् नास्ति ह. 20. छन्दोगानाम् छान्दोग्यम् ब. 21. औक्थिक्यम् नास्ति फ. 22. शब्देभ्यः इत्यधिकम् क.फ.ह. 23. अर्थे फ.ह. 24. अपूपानां समूहः नास्ति 25. साक्तुकं मौदकिकम् इत्यधिकम् क. 26. अधेनूनां समूहः आधेनवम् ग.